राष्ट्रियसंस्कृतविश्वविद्यालयः - तिरुपतिः
(संसदः अधिनियमेन संस्थापितः विश्वविद्यालयः)

**डा. का. लीनाचन्द्रा**
संयोजिका

**डा. वि. धर्मदासन्**
सहसंयोजकः


## अखिलभारतीयसंस्कृतछात्रसांस्कृतिकयुवमहोत्सवः - 2026

**To**

………………………
………………………
………………………

**मान्याः,**

**विषयः – अखिलभारतीयसंस्कृतछात्रसांस्कृतिकयुवमहोत्सवः – 2026 ( संस्कृत रूपकेषु ) आमन्त्रणम् ।**

पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन प्रसिद्धेन तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन शास्त्राणां संरक्षणाय संवर्द्धनाय च अविच्छिन्नरूपेणाधुनिके जगति सततं प्रयासो विधीयते ।

अखिलभारतस्तरे विश्वविद्यालयोऽयं संस्कृतशिक्षायाः प्रमुखसंस्थात्वेन बहुकालात् प्रसिद्धः सन् प्रमाणयति यत् शिक्षायाः लक्ष्यं न केवलं छात्राणां ज्ञानवर्द्धनम्, अपि तु तेषामन्तर्निहितप्रतिभाप्रकाशनेन सर्वाङ्गीणविकाससाधनमिति । तदर्थमेव राष्ट्रियसंस्कृतविश्व-विद्यालयेऽस्मिन् छात्रप्रतिभान्वेषणाय प्रतिवर्षं विविधाः शैक्षिक-सास्कृतिक-क्रीडास्पर्धाः समायोज्यन्ते । तदङ्गत्वेन संस्कृतछात्रेषु उत्साहसंवर्द्धनाय विश्वविद्यालयोऽयं २००७ संवत्सरादारभ्य नियमितरूपेण दिनचतुष्टयात्मकम् अखिलभारतीयसंस्कृतछात्रप्रातिभसमारोहं सफलतया समायोजयति । अस्मिन् संवत्सरे **अखिलभारतीयसंस्कृतछात्रसांस्कृतिकयुवमहोत्सवः - 2026** इति नूतनोऽयं प्रकल्पः **08-02-2026** दिनाङ्कतः **11-02-2026** दिनाङ्कपर्यन्तं समायोक्ष्यते ।

तत्र भवन्तो भवन्तः समारोहेऽस्मिन् भागं ग्रहीतुं भवत्संस्थातः छात्रान् कृपया प्रेषयन्त्विति सम्प्रार्थना ।

### समारोहस्यास्य सम्पूर्णं विवरणम् अधो निर्दिष्टमस्ति

**समारोहस्यास्य सन्त्यधोलिखितान्युद्देश्यानि –**

१. संस्कृतछात्राणां सांस्कृतिककौशलविकासाय समुचितावसरप्रदानम् ।
२. विभिन्नसंस्कृतसंस्थानां संस्कृतच्छात्राणां मध्ये सौहार्दस्य दृढीकरणम् ।
३. संस्कृतच्छात्रेषु सांस्कृतिकस्पर्धायामुत्साहसंवर्द्धनम् ।

४. अखिलभारते विभिन्नस्थलेषु विद्यमानानां संस्कृतसंस्थानां छात्राणाञ्च आत्ममूल्याङ्कनाय स्वप्रतिभागवेषणाय चावकाशप्रदानम्।

५. संस्कृतच्छात्राणां सांस्कृतिककौशलानां संवर्द्धनाय प्रेरणाप्रदानञ्च । अनेन ते आत्मनः सन्तुलितव्यक्तित्वविकासेन भारतस्य दायित्वसम्पन्ननागरिकाः भवेयुः ।

**स्पर्धायाः पुरस्काराः**

प्रथमः पुरस्कारः - समूहस्य कृते प्रमाणपत्रम्, ५००० धनराशिः, संस्थायै स्वर्णपदकं च ।

द्वितीयः पुरस्कारः - समूहस्य कृते प्रमाणपत्रम्, ३००० धनराशिः, संस्थायै रजतपदकं च ।

तृतीयः पुरस्कारः - समूहस्य कृते प्रमाणपत्रम्, २००० धनराशिः, संस्थायै कांस्यपदकं च ।

सर्वोत्तमाभिनेता - प्रमाणपत्रम् तथा २००० धनराशिश्च ।

सर्वोत्तमाभिनेत्री - प्रमाणपत्रम् तथा २००० धनराशिश्च ।

## परिशिष्टम्

## साधारणनियमाः

**१.** प्रतिसंस्कृतानुष्ठानमधिकाधिकं चतुर्दशजनैः सहितः समूहः प्रेषणीयः । प्रत्येकं भागग्रहणसंस्था केवलमेकं गणं प्रेषयितुं शक्नोति यस्मिन् **10 दशच्छात्राः, 02 द्वौ साहायकौ** तथा च सम्पूर्णस्य दलस्य कृते मार्गदर्शकरूपेण **द्वौ अध्यापकौ (एकः अध्यापकः तथा एका अध्यापिकाश्च)** इत्याहत्य अधिकाधिकं **14** (चतुर्दश) जनाः आगन्तुं शक्नुवन्ति।

२. **स्पर्धायां भागग्रहणाय छात्राणां योग्यता –**

अ. तत्तदनुष्ठानानां नियमिताः (Regular) छात्रा एव भागं ग्रहीतुमर्हन्ति । शास्त्री, B.A(Sans),B.Sc,ITEP,आचार्य,M.A,M.Sc,शिक्षाशास्त्री,B.Ed. शिक्षाचार्या, M.Ed. छात्रा एव भागं ग्रहीतुमर्हन्ति । **विद्यावारिधिः (PhD) छात्राः अस्यां स्पर्धायां भागं ग्रहीतुं नार्हन्ति । दूरस्थशिक्षाकेन्द्रे पञ्जीकृताश्छात्राः (CDOE) अप्यत्र भागं ग्रहीतुं नार्हन्ति ।**

आ. एकः छात्रः एकस्यैव विश्वविद्यालयस्य प्रतिनिधिर्भवेत् ।

इ. छायाचित्र-कक्ष्यासूचनासहितानि परिचयपत्राणि तत्तदनुष्ठानाधिकारिणां हस्ताक्षराङ्कितानि छात्रैरवश्यमानेयानि ।

## ३. अनुशासनम्

अ. सर्वैः प्रतिस्पर्धिभिः छात्रैः अनुशासितैः भाव्यम्। यः कोऽपि अनुशासनहीनः किमपि असामाजिकं कार्यं कुर्वन् लक्षितः चेत् सः स्पर्धायां भागग्रहणाय अनर्हः भविष्यति।

आ.स्पर्धायां चत्वारः भागग्रहीतारः गणाः लभ्यन्ते चेदेव स्पर्धा आयोज्यते।

## ४. यात्राव्ययविवरणम् –

अ. प्रतिभागिभ्यः छात्रेभ्यः, मार्गनिर्देशकायाध्यापकाय च **द्वितीयश्रेणी (Sleeper)** रेलयानस्य गमनागमनयात्राव्ययः विश्वविद्यालयेन दीयते । तत्तद्विद्यासंस्थाधिकारिभिः रेलयानमूल्योगव्यवस्था (Railway fare Concession) स्वीकरणीया इति सूच्यन्ते । राष्ट्रियसंस्कृतविश्वविद्यालयेन तत्कालचीटिकायाः देयमूल्यं न प्रदास्यते।

आ. प्रतिभागिनां छात्राणामावासव्यवस्था रा.सं.विश्वविद्यालयेन कल्प्यते । आच्छादनशयनवस्त्रादिकं (Bed Sheets etc.) स्वयमेव आनयेयुः । तदवसरे तिरुपति नगरस्य वायुः सुखदस्तथा स्थानीयं तापमानं २०-३० डिग्रीपरिमितं भवितुमर्हति।

इ. पञ्जीकरणार्थं सम्बद्धसंस्थाः पञ्जीकरणपत्राणि यथावत्प्रपूर्य निर्दिष्टदिनाङ्कं यावत् प्रेषयेयुः।

### स्पर्धायाः नियमाः

**केवलं दश (10) भागग्रहीतारः एव एकस्मिन् गणे भवेयुः।**

अ. एकः समूहः एकमेव रूपकं प्रदर्शयेत्।

आ. एकाङ्किकाप्रदर्शनकालः त्रिंशन्निमेषा (25+5)। कदापि निश्चितसयः नातिक्रमणीयः।

इ. पात्रधारिणः दशाधिकाः न भवेयुः।

ई. वस्त्राभूषणादिव्यवस्था स्वयमेव कार्या।

उ. एकाङ्किकाः पौराणिकं, प्राचीनम्, आधुनिकं वा विषयमवलम्ब्य संस्कृतभाषयैव निबद्धा भवेत्।

ऊ. प्रतिभागिसमूहेन प्रहसनस्य सारसंग्रहः पञ्जीकरणपत्रेण सहैव समर्पणीयः । विलम्बेन प्रेषितः नाङ्गीकरीष्यते।

ऋ. प्रहसने आचारसंहितायाः उल्लङ्घनं कुर्वती सामग्री न भवितुमर्हति । यदि प्रहसने कोऽपि आक्षेपार्हः विषयः अस्ति तर्हि आयोजकसंस्था तस्य उत्तरदायी न भवति।

**स्वीकृतिपत्रं तु 15 जनुवरी 2026 दिनाङ्कात् पूर्वं ई-मेल्द्वारा प्रेषणीयम्।**
**अस्मदीयः ई-मेल् सङ्केतः – aisscyf@nsktu.org**

राष्ट्रियसंस्कृतविश्वविद्यालयस्य (www.nsktu.ac.in) जालपुटे अन्तर्जालमाध्यमेन पञ्जीकरणार्थं सम्पर्कसूत्रं प्रदत्तमस्ति **QR code** अधः दत्तमस्ति । सर्वे कृपया सम्पर्कसूत्रद्वारा स्वकीयसंस्थागतछात्राणां पञ्जीकरणं कुर्वन्त्विति संसूच्यते ।

स्पर्धाविषये या काऽपि जिज्ञासा तथा वार्ताप्राप्तिसूचना च अधोनिर्दिष्टसङ्केतमाध्यमेन विधातव्या ।

**Scan the QR for the Registration**

**Last date of Receiving Entries**

**Extended up to 15th January 2026**

**डा. का. लीनाचन्द्रा**
**समायोजिका**
**अखिलभारतीयसंस्कृतछात्रसांस्कृतिक**
**युवमहोत्सवः – 2025-26**
**राष्ट्रियसंस्कृतविश्वविद्यालयः**
**तिरुपतिः – 517507**
**चलद्वाणी - 09703035618**

**डा. वि. धर्मदासन्**
**सहसमायोजकः**
**अखिलभारतीयसंस्कृतछात्रसांस्कृतिक**
**युवमहोत्सवः – 2025-26**
**राष्ट्रियसंस्कृतविश्वविद्यालयः**
**तिरुपतिः – 517507**
**चलद्वाणी - 09746236507**

**श्री. कडियम् वेङ्कट नारायण राव्**
**कुलसचिवः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः**
**तिरुपतिः – 517507**
**दूरभाषा – 0877-2286799**
Fax – **0877-2287809**
Website: http://www.nsktu.ac.in

धन्यवादपुरस्सरम्

भवदीयः

कुलसचिवः 28/11/2025